श्रीकाव्यकौस्तुभः
Śrī Kāvya-kaustubhaḥ
The Jewel of Poetry

Version 0.1

श्रीबलदेवविद्याभूषणः
by Baladeva Vidyābhūṣaṇa
edited, translated, and annotated
by
Neal Delmonico

November 18, 2001

Contents

Chapter 1

प्रथमा प्रभा: काव्यफलादिनिर्णयः

कलाभिर्निर्भृतः श्रीमान् राधया समलङ्कृतः ।
दीव्यत्कुवलयः सोऽयं विधुर्विजयतेतराम् ॥

प्रारिप्सितस्यास्य शास्त्रस्य काव्याङ्गत्वात् काव्यफलमेव फलमिति तावदाअह ।

कीर्तिः सार्वज्ञ्यमानन्दो धनादीनि च काव्यतः ।

सार्वज्ञ्यं देवमानवादिप्राणिचेष्टावगतिरूपः । आनन्दो रसानुभवसमुद्भूतः धनं नृपतिप्रसादलब्धा हस्त्यश्वादिसम्पत् आदिना धर्मकाममोक्षाः । तत्र धर्मो भगवद्व-न्दनादिः । कामो धनद्वारकः । मोक्षो ज्ञानकाण्डे व्युत्पत्तिविधानाअदित्येतत् सर्वं काव्यादेव भवेदतस्ततत्र पुंभिः सयत्नैर्भाव्यम् । तस्य हेतुमाह ।

हेतुस्तस्य भवेच्छक्तिः शिक्षा निपुणता तथा ॥

शक्तिः पूर्वसंस्कारः शिक्षा काव्यविदुपदेशः निपुणता तु व्याकरणाभिधानकोष-च्छन्दःप्राचीनकाव्यादिनिभालनाद् व्युत्पत्तिः तस्य कावस्योद्भवे कारणम् । तस्य लक्षणमाह ।

कविना निर्मितं वाक्यं काव्यम् ।

चमत्कारकरगद्यपद्यात्मना रचितं कवेर्वाक्यं काव्यं । उदाहरणम् —

कोकिलकलकृतकम्पां तनुजितशम्पां प्रियां पश्यन् ।
वपुरवनमितपयोदः समुदितमोदः स माधवो जयति ॥

गद्यपद्ययोश्चमत्कारकरत्वं चातुर्यादेव भवति । चातुर्यं तु युक्तिविशेषार्थं नियोजनम् । तथा हि वर्णयन्ति — शत्रोर्गदितवीर्यादेर्निर्जयान्नायकस्तुतिः । चातुर्यमिति पश्चात्तनं सम्बध्यते । उदा. —

उग्रप्रासधनुर्विद्यं सर्वज्ञं क्षात्रकुण्टकं ।
गविष्टं खर्वयामास भार्गवं राघवाग्रणी ॥

दृष्टान्तेनाल्पवर्णेन महतोऽर्थस्य कीर्तनम् ॥

उदा. —

नृगवत् स गतिं याति यो ब्रह्मस्वापहारकः ।

अत्र नृगवदित्यनेन नृगाख्यायिकाव्यक्तिः ।

पद्येन लघुना वा स्याद्गम्भीरार्थप्रकाशनम् ॥

यथा —

निजभक्तसुखार्थं यः कालमप्यतिवर्त्तते ।
पुरुषाय नमस्तस्मै कस्मैचित्पुरुतेजसे ॥

रावणेअ निपीडितः सुरैरभ्यर्थितो भगवान् द्वापर एव तद्विनाशकालं त्रेतां प्रकल्प्य तं विजिधान अदित्या तोषोतश्च तत्सुखाय बलिव्र्द्धिकालमन्यथयन् बलिं दूषयामासेति पद्यादस्मात्प्रकाशते ॥

अपारानन्दविज्ञप्तिर्या स्यान्न्यूनपदादिभिः ।

यथा —

सस्मिता मृगशावाक्षो गाढमालिङ्गिता मया ।
मा मा मेति यदब्रूत तन्मे कृन्तति मानसम् ॥

अत्र मेत्यनन्तरं पीडयेति पदमूनं सत्तस्याः सुखसिन्धुमग्नतां बोधयति ।

हेतोरतिप्रसिद्धस्य न कुर्यादादरं क्वचित् ॥

यथा —

न युद्धेन भ्रुवोः स्पन्दनैव वीरा निबारिताः ।

विख्यातसहितोक्तिश्चेत्तत्सादृश्याय कल्पते ॥

यथा —

युवामेव हि विख्यातौ त्वं बलैर्जलधिर्जलैः ॥

अत्राम्बुधिसाहित्येनोक्तिर्नृपतेस्तत्तुल्यतायै स्यात् ।

ख्यातदोषनिरासश्च वीक्ष्यते गुणवर्णनात् ।

यथा —

मुधा निन्दति संसारं कंसारिर्यत्र पूज्यते ।

चातुर्यं कवितायां स्यादेवमाद्यर्थयोजनं ॥ स्फुटं, इदं काव्यलक्षणं कविवचनमात्रेणातिव्याप्तं निर्मितमित्युक्तेः । वाक्यं रसात्मकं काव्यमिति तु रामः सहसा तया क्रोडतीत्यत्रातिव्याप्तं रसात्मकवाक्यत्वात् । अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यमिति तु कुरङ्गनयनेत्यत्रातिव्याप्तम् तादृशशब्दार्थरूपत्वात् । अथास्य शरीरादिस्वरूपमाह ॥ शब्दार्थविग्रहं काव्यमिति सम्बध्यते । शब्दार्थशरीरं काव्यमिति ।

तस्यात्मा तु रसो व्यङ्ग्यस्तदन्यः प्राण उच्यते ।

रसभावादिर्व्यङ्ग्यः काव्यस्यात्मा । वस्त्वादिस्तु प्राणः ।

रसभावतदाभासभावशान्त्यादिको गणः ।
सर्वोऽपि रस्यमानत्वाद्रसशब्देन कीर्तितः ॥

स्फुटम् ।

उत्कर्षकारणानि स्युर्गुणालङ्काररीतयः ॥

ओजःप्रभृतयो गुणाः शौर्यादिवत् काव्यस्योत्कर्षकाः ।

अनुप्रासोपमादयोऽलङ्काराः कुण्डलकङ्कणादिवत् ।
वैदर्भीप्रमुखा रीतयस्त्वङ्गसंस्थानविशेषवत् ।
दोषाः श्रुतिकटुत्वाद्या भवेयुरपकर्षकाः ।

काणत्वादिवत् श्रुतिकटुत्वादयः काव्यमपकर्षयन्तस्तस्य दोषाः स्युः । गुणादिषु ये यद्धर्मा यथा यदुत्कर्षयन्त्यपकर्षं यान्ति च तत्तूर्द्ध्वं वक्ष्यामः ।

इति काव्यकौस्तुभे काव्यफलादिनिर्णयः प्रथमा प्रभा ॥